दशमः पाठः

# आह्वानम्

पुरातनकालादेव भारतवर्षं ज्ञानविज्ञान–धनधान्य–शौर्यपराक्रमादिरूपेण सर्वथा समृद्धं वर्तते; किन्तु कालक्रमेण अत्रत्याः जनाः सम्प्रति स्वास्मिताबोधेन रहिताः दृश्यन्ते। यदा सर्वत्र दुराचार–अशिष्टाचारपरायणता विद्यते, तदा शीलचारित्र्यसम्पन्नानां नारीणां सम्मानः कथं संरक्षितो भवेत्, भ्रष्टाचारस्य स्थाने शिष्टाचारस्य संस्थापना मातृभूमेः गौरवाय कथं भवेत् इति कृत्वा महाकविः गीतेऽस्मिन् युवजनान् आह्वयति।

''आह्वानम्'' इत्येतत् गीतम् आशुकविना प्रज्ञाचक्षुषा व्याकरणसाहित्याचार्येण पण्डितश्रीदयाशङ्करवाजपेयिमहाभागेन भारतचीनदेशयोः मध्ये सञ्जाते युद्धे रणभूमिं गत्वा सैनिकैः सह प्रत्यक्षचर्चां कृत्वा विरचितम्।

*युवान एष वः परीक्षणस्य काल आगतः*
*हिमालयस्य रक्षणे समुद्यताः स्थ सर्वतः।*
*अयं सखा पुरातनोऽस्य भारतस्य विद्यते*
*स्वकर्मणि प्रवर्तितुं कदापि नैव खिद्यते ॥1॥*

*अखर्वगर्ववृत्तिनारिणात्र येन वीक्षितं*
*सहेक्षणेन तत्क्षणन्तु तच्छिरः क्षितौ धृतम्।*
*यथा क्षमावशा वयं तथैव रोषपूरिताः*
*यथैव शीलसंस्कृतास्तथा प्रसिद्धशूरताः ॥2॥*

*पुरातनं स्वपौरुषं स्मरन्तु वीरबन्धवः*
*अशेषतां प्रयान्तु शत्रवोऽद्य पापसिन्धवः।*
*निजप्रवञ्चनाफलं समाप्नुवन्तु ते द्रुतं*
*यथा विहाय कूटनीतिमाचरन्तु तेऽद्भुतम् ॥3॥*

*कृषीबलैः समेधिता भवन्तु धान्यवृद्धयः*
*श्रमेण सन्तु साधितास्तु वीरसाहसर्द्धयः।*
*स्मरन्तु पूर्वपूरुषैर्जगत्सु यद् यशोऽर्जितम्*
*समस्तदिक्षु विश्रुतं तदद्य यावदूर्जितम् ॥4॥*

*वयं तु सत्यनिष्ठया स्वदेशरक्षणोद्यताः*
*प्रवञ्चनैकदक्षशत्रुपक्षतक्षणव्रताः ।*
*नदीषु सन्तु यन्त्रयानलौहमार्गसेतवः*
*अरातिनीवृतिं स्फुरन्तु भारतीयकेतवः ॥5॥*
*अये वशिष्ठ-याज्ञवल्क्य-गौतमात्रिवंशजाः*
*तथैव सूर्यचन्द्रपावकान्ववायतल्लजाः ।*
*भवत्सु जीवितेषु हन्त ! किं नदन्ति दस्यवः?*
*कदा प्रदर्शयिष्यते द्विषां फलं बलस्य वः ॥6॥*

**अन्वयः-** युवान ! एषः कालः वः परीक्षणस्य आगतः (अस्ति), सर्वतः हिमालयस्य रक्षणे समुद्यताः स्त । अयम् अस्य भारतस्य पुरातनः सखा विद्यते स्वकर्मणि प्रवर्तितुं कदापि न एव खिद्यते । अत्र येन अखर्वगर्ववृत्तिना अरिणा वीक्षितम्, (तदा) तत् क्षणं तु ईक्षणेन सह तच्छिरः क्षितौ धृतम्, वयं यथा क्षमावशाः (स्मः), तथैव (वयं) रोषपूरिता (अपि स्मः), (एवमेव) यथा शीलसंस्कृता एव तथा प्रसिद्धशूरताः (स्मः) । वीरबन्धवः ! पुरातनं स्वपौरुषं स्मरन्तु, अद्य पापसिन्धवः शत्रवः अशेषतां प्रयान्तु । ते द्रुतं निजप्रवञ्चनाफलं समाप्नुवन्तु, यथा ते अद्भुतं कूटनीतिं विहाय आचरन्तु । कृषीबलैः धान्यवृद्धयः समेधिताः भवन्तु, श्रमेण साधिताः तु वीरसाहसर्द्धयः सन्तु । पूर्वपूरुषैः जगत्सु, समस्तदिक्षुविश्रुतं यावद् ऊर्जितं यशः अर्जितं, तद् अद्य स्मरन्तु । वयं तु सत्यनिष्ठया स्वदेशरक्षणोद्यताः, प्रवञ्चनैकदक्षशत्रुपक्षतक्षणव्रता (स्मः), नदीषु यन्त्रयानलौहमार्गसेतवः सन्तु, भारतीयकेतवः अरातिनीवृतिं स्फुरन्तु । हन्त ! अये वसिष्ठ-याज्ञवल्क्य-गौतम-अत्रि वंशजाः (सन्ति), तथैव सूर्यचन्द्रपावकान्ववायतल्लजाः भवत्सु जीवितेषु दस्यवः किं नदन्ति ? वः बलस्य फलं द्विषां (कृते) कदा प्रदर्शयिष्यते ।

## शब्दार्थः

युवानः - हे युवको । एषः - यह । वः - तुम्हारा । सर्वतः - सभी ओर से । समुद्यताः - तैयार । स्त - हों (अस् धातुः- लोट्लकारः, मध्यमपुरुषः बहुवचन) । प्रवर्तितुम् - प्रवृत्त होने के लिए । खिद्यते - दुःखी होता है । अखर्वगर्ववृत्तिना - बड़े घमण्डी आचरण वाले के द्वारा । अरिणा - शत्रु के द्वारा । वीक्षितम् - देखा गया । सहेक्षणेन - देखने के साथ ही । धृतम् - रख दिया । क्षमावशाः - क्षमाशील (बहु.) । रोषपूरिताः - क्रोध से भरे हुए । पुरातनम् - प्राचीनकालीन । स्वपौरुषम् - अपने पुरुषत्व को । पापसिन्धवः - पापरूपीसमुद्र । अशेषताम् - समाप्ति को । निजप्रवञ्चनाफलम् - अपने ठगी रूपी कर्म के फल को । समाप्नुवन्तु - प्राप्त करें । विहाय - छोड़कर । आचरन्तु - आचरण करें । कृषीबलैः - किसानों के द्वारा । समेधिताः - वृद्धि को प्राप्त । वीरसाहसर्द्धयः- पराक्रम-उत्साह की वृद्धि । पूर्वपुरुषैः - पूर्वजों के द्वारा । दिक्षु - दिशाओं में । विश्रुतम् - विख्यात । ऊर्जितम् - तेजस्वितापूर्ण । स्मरन्तु - स्मरण करें । सत्यनिष्ठया - सत्यनिष्ठा से । उद्यताः - तैयार । प्रवञ्चनैकदक्षशत्रुपक्षतक्षणव्रताः - एकमात्र छल-कपट में निपुण शत्रुओं के पक्ष को काटने का व्रत धारण करने वाले ।

यन्त्रयानलौहमार्गसेतवः - मशीनों द्वारा चलने वाले वाहन, लोहे की पटरी वाले रास्ते तथा पुल (बहु.) । केतवः - पताकाएँ, झण्डे। अरातिनीवृत्तिम् - शत्रु को सब ओर से पकड़कर मारने के भाव को। स्फुरन्तु - स्फुरित करें, उद्दीप्त करें। हन्त ! - खेद है। वंशजाः - वंश में उत्पन्न। अन्ववायतल्लजाः:- कुल में सर्वश्रेष्ठ (बहु.)। भवत्सु - आप सब में। जीवितेषु - जीवित रहते हुए। दस्यवः - लुटेरे। नदन्ति - बोल रहे हैं। वः - तुम्हारे। द्विषाम् - शत्रुओं के। प्रदर्शयिष्यते - प्रदर्शित होगा।

## अभ्यासः

### 1. एकपदेन उत्तरं लिखत –

(क) भारतस्य पुरातनः सखा कः विद्यते ?

(ख) कस्मिन् प्रवर्तितुं कदापि न खिद्यते ?

(ग) पापसिन्धवः शत्रवः कां प्रयान्तु ?

(घ) वयं कया स्वदेशरक्षणोद्यताः ?

(ङ) भारतीयकेतवः कां वृत्तिं स्फुरन्तु ?

### 2. एकवाक्येन उत्तरं लिखत –

(क) कृषीबलैः काः समेधिताः भवन्तु ?

(ख) ऊर्जितं यशः कैः अर्जितम् ?

(ग) अखर्वगर्ववृत्तिना केन वीक्षितम् ?

(घ) भारतीयाः केषां वंशजाः सन्ति ?

(ङ) शत्रवः द्रुतं किं फलं प्राप्नुवन्तु ?

### 3. अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) वीरबन्धवः किं कुर्वन्तु ?

(ख) अद्य कं स्मरन्तु ?

(ग) भवत्सु जीवितेषु के नदन्ति ?

### 4. उचितशब्देन रिक्तस्थानानि पूरयत –

(क) स्वकर्मणि प्रवर्तितुं .................................... नैव खिद्यते। (अद्यापि/कदापि)

(ख) पुरातनं स्वपौरुषं ................................. वीरबन्धवः। (विस्मरन्तु/स्मरन्तु)

(ग) यथा विहाय ...................................... आचरन्तु तेऽद्भुतम्। (कूटनीतिम्/राजनीतिम्)

(घ) समस्तदिक्षु .................................. तदद्य यावदूर्जितम्। (श्रुतं/विश्रुतं)

(ङ) कदा प्रदर्शयिष्यते द्विषां .................................. बलस्य वः। (बलं/फलं)

5. **यथायोग्यं योजयत –**

| 'अ' | 'आ' |
| --- | --- |
| (क) वयं यथा क्षमावशाः | तथा प्रसिद्धशूरताः |
| (ख) यथा शीलसंस्कृताः | तथैव रोषपूरिताः |
| (ग) परीक्षणस्य | धान्यवृद्धयः |
| (घ) स्वपौरुषम् | कालः |
| (ङ) कृषीबलैः | स्मरन्तु |

6. **अधोलिखितपदानां मूलशब्दं विभक्तिं वचनञ्च लिखत –**

| पदम् | मूलशब्दः | विभक्तिः | वचनम् |
| --- | --- | --- | --- |
| यथा -हिमालयस्य | हिमालय | षष्ठी | एकवचनम् |
| (क)स्वकर्मणि | | | |
| (ख)कृषीबलैः | | | |
| (ग)वयम् | | | |
| (घ)केतवः | | | |

7. **अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनञ्च लिखत –**

| क्रियापदानि | धातुः | लकारः | पुरुषः | वचनम् |
| --- | --- | --- | --- | --- |
| यथा - सन्तु | अस् | लोट्लकारः | प्रथमपुरुषः | बहुवचनम् |
| (क) नदन्ति | | | | |
| (ख) प्रदर्शयिष्यते | | | | |
| (ग) विद्यते | | | | |
| (घ) स्मरन्तु | | | | |

8. **विलोमशब्दान् लिखत –**

यथा - स्वदेशः विदेशः

(क) स्मरन्तु

(ख) पुरातनम्

(ग) अशेषताम्

(घ) सत्यनिष्ठया

## 9. पर्यायशब्दान् लिखत -

यथा -सूर्यः — दिवाकरः, भास्करः

(क) कालः

(ख) क्षितौ

(ग) शत्रवः

(घ) जगत्सु

## 10. रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत -

(क) **दस्यवः** नदन्ति ।

(ख) वयं **हिमालयस्य** रक्षणे समुद्यताः ।

(ग) **पापसिन्धवः** शत्रवः अशेषतां प्रयान्तु ।

(घ) ते **कूटनीतिं** विहाय आचरन्तु ।

(ङ) **नदीषु** यन्त्रयानलौहमार्गसेतवः सन्तु ।

## योग्यताविस्तारः -

- पाठे आगतं गीतं लयबद्धं गायत ।
- देशभक्तिविषयकम् अन्यसंस्कृतगीतम् अन्विष्य गायत ।